कान् पुङ्गवैर्ब्राह्मैर्मध्येन हविषा सुरान्। श्रियं शक्रत्प्रवृत्तेन तर्पयिष्यामः कामदाः। तदस्माकं गुरुस्त्वं हि प्राणदश्च महाबल!। अद्यप्रभृति नो राजा त्वमिन्द्रो वै भव प्रभो!। तस्मात्त्वं काञ्चनैः पूर्णैर्दिव्यस्य पयसो घटैः। एभिरद्याभिषिच्यस्व मया हस्तावनामितैः। अहं किलेन्द्रो देवानां त्वङ्गवामिन्द्रताङ्गतः। गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्। ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरोश्वरः। उपेन्द्र इति कृष्ण! त्वां गास्यन्ति दिवि देवताः"।

"ततः शक्रस्तु तान् गृह्य घटान् दिव्यपयोधरान्। अभिषेकेन गोविन्दं योजयामास योगवित्। दृष्ट्वाऽभिभिच्यमानं तं गावस्ताः सह यूथपैः। स्तनैः प्रस्रवसंयुक्तैः सिषिचुः कृष्णमव्ययम्। मेघाश्च दिवि मुक्ताभिः साम्भताभिः समन्ततः। सिषिचुस्तोयधाराभिः सिच्यमानं तमव्ययम्। वनस्पतीनां सर्वेषां सुस्रावेन्दुनिभं पयः। ववर्ष पुष्पवर्षञ्च नेदुस्तूर्य्याणि चाम्बरे। स्तुवन्ति मुनयः सर्वे वाग्भिर्मन्त्रपरायणाः। एकार्णवविविक्तञ्च दधार वसुधा वपुः। प्रसादं सागरा जग्मुर्ववाता जगद्धिताः। मार्गस्थो विबभौ भानुः सोमो नक्षत्रसंयुतः। ईतयः प्रशमं जग्मुर्जग्मुर्निर्वैरतां नृपाः। प्रवालपत्रशवलाः पुष्पवन्तश्च पादपाः। मदं प्रसुस्रुवुर्नागा यातास्तोषं वने मृगाः। अलङ्कृता गात्ररुहैर्धातुभिर्भान्ति पर्वताः। देवलोकोपमो लोकस्तृप्तोऽमृतरसैरिव। आसीत् कृष्णाभिषेके हि दिव्यः स्वर्गरसोक्षितः। अभिषिक्तन्तु तं गोभिः शक्रो गोविन्दमव्ययम्। दिव्यमाल्याम्बरधरं देवदेवोऽब्रवीदिदम्। एष ते प्रथमः कृष्ण! नियोगो गोषु यः कृतः"। तत्रैव १७अ०। "शक्रस्तु स्वयमागत्य दैवतैः सह वृत्रहा। अभिषिच्याब्रवीत् कृष्णमुपेन्द्रेति शचीपतिः"। वासुदेवस्यैवेन्द्रेण उपेन्द्रनाम्नाऽभिषेकः कृतः इत्युक्तम्। भा०८स्क०२३ अ० तु वामनस्यैव तन्नामतोक्ता यथा वामनेन बलेर्दमनानन्तरम्। "कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च। लोकानां लोकपालानामकरोत् वामनं पतिम्। वेदानां सर्वदेवानां धर्मस्य यशसां श्रियः। मङ्गलानां व्रतानाञ्च कल्पं स्वर्गापवर्गयोः। उपेन्द्रं कल्पयाञ्चक्रे इति सर्वविभूतये इति" "प्राप्य त्रिभुवनञ्चेन्द्र उपेन्द्रभुजपालितः" इति तत्रैव। वामनस्य उपेन्द्रत्वमिन्द्रानुजातत्वात् वासुदेवस्य तु पूर्वोक्तप्रकारेण तन्नामता उभयोरेव एकपरमेश्वरांशत्वान्न विरोधः। "तदिन्द्रसन्दिष्टमुपेन्द्र! यद्वचः" माघे नारदस्य वासुदेवसम्बोधनतया प्रयोगः।

**उपेन्द्रवज्रा** स्त्री "उपेन्द्रवज्रा जतजास्ततो गौ" इति वृ०र० उक्ते एकादशाक्षरपादके छन्दोभेदे। अस्याश्च इन्द्रवज्रया संमेलने यथोपजातित्वं तथा इन्द्रवज्राशब्दे दर्शितम्।

**उपेय** त्रि० उप+इण्—यत्। १उपायसाध्ये, २प्राप्तव्ये च। २उपगम्ये "उपेतारमुपेयञ्च सर्वोपायाश्च कृत्स्नशः" मनुः "ज्ञातित्वेनानुपेयास्ताः" मनुः। ३अन्विष्य गम्ये "भूधरस्थिरमुपेयमागतम्" माघः। "उपेयमन्विष्य गम्यम्" मल्लि०

**उपेयिवस्** त्रि० उप+इण—क्वसु लोकेऽपि नि०। उपगते "पश्चाद्भेदमुपेयुषे" कुमा० "उपेयिवांसि कर्त्तारः पुरीमाजातशात्रवीम्। राजन्यकानि" "उपेयुषो मोक्षपथं मनस्विनः" माघः। स्त्रियां ङीपि उपेयुषी।

**उपोढ** त्रि० उप+वह—क्त। सन्निवेशविशेषयुक्ते १व्यूढे सैन्ये २निकटे, "तदुपोढैश्च नभश्चरैः पृषत्कः" किरा० त "वराहमुपोढैः प्रत्यासन्नैः" मल्लि०। ३ऊढे कृतविवाहे च। भावे क्त। सैन्यविन्यासभेदे व्यूहे न०।

**उपोत** त्रि० उप+वेञ् क्त। उपस्यूते। गौरा० ङीष्। पूतिकायां स्त्री शब्दरत्ना०

**उपोत्तम** त्रि० उपगतमुत्तमम् अव्यधानेन अत्या० स०। उपान्तिमे अन्त्यात् पूर्व्वतने। "गुरूपोत्तमयोः ष्यङ् गोत्रे"। "योपधाद्गुरूपोत्तमाद्वुञ्" "अत्युपोत्तमम्" "उपोत्तमं रिति" पा०

**उपोदक** पु० उपगतमुदकम् अत्या०स०। उदकसमीपस्थे। "प्रजापतौ त्वा देवतायामुपोदके" यजु० २५, ६, "अयं वै लोक उपोदकस्तदेनं प्रजापतौ देवतायामुपोदके लोके निदधाति" शत०ब्रा० १३, ८, ३, ३, सामीप्ये अव्ययी०। २उदकसमीपे अव्ययम्।

**उपोदकी** स्त्री उपगतमुदकमत्र गौरा० ङीष्। पूतिकायाम् (पुइशाक)। राजनि०। "द्वादश्यां पारणं कुर्य्याद् वर्ज्जयित्वाप्युपोदकीम्" ए० त० कूर्म्मपुराणम्।

**उपोदिका** स्त्री उपाधिकमुदकं यत्र उदादेशः संज्ञायां कन् अतइत्त्वम्। पूतिकाशाके अमरः तत्पाकादि प्रकारगुणादि वैद्यके उक्तम्। "एकाहं षड्गमोपेता क्षिमन्यैर्व्यञ्जनान्तरैः। तण्डुलैरानतव्याजैर्हिंसत्येषा उपोदिका। वटपत्रवच्छुभपत्रिका परितप्ततैलसुपाचिता। नवहिङ्गुवाससुवासिता परिभोक्तृचित्तसुविकाशिका। सुतप्तवतैलविपाचिता सुघनाम्लतक्रसुपाचिता। स्वपोदिकाव्यभर्ज्जिता भोक्तुराशु रसनाप्यनर्त्तकी। पोदिका शीतला बल्या श्लेष्मला